# Shri Gangastavanam

# શ્રી ગઙ્ગાસ્તવનમ્

## Document Information

Text title : gangAstavanam 2

File name : gangAstavanam2.itx

Category : devii, devI, nadI

Location : doc_devii

Author : viShNuprasAdapANDeya

Transliterated by : Musiri Janakiraman

Proofread by : Musiri Janakiraman, PSA Easwaran

Latest update : June 22, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 22, 2021

*sanskritdocuments.org*

# શ્રી ગઙ્ગાસ્તવનમ્

મુરારેઃ સર્વસ્વં પ્રચુરતપસાં ખણ્ડપરશોઃ
ફલં ભૂભૃદ્રાજા સુસમતનુજાયાઃ પ્રિયસખી
વિરઞ્ચેર્વેદાર્થામૃતસરસધારેભવદના-
ઽમ્બિકોઞ્ચંવર્ચસ્યં ક્રમત ઇહ જહ્નોસ્ત્રિભુવને ॥ ૧॥

કમણ્ડલ્વાં ધાત્રા હરિચરણમાક્ષાલ્ય નિહિતા
બૃહજ્જ્યોતીરૂપા કલુષમહિષામર્દનપટુઃ ।
મહાદુર્ગા દુર્ગત્યતુલવલદાવાનલશિખા
તતઃ શૈવે મૂર્ધ્નિ પ્રસરસિ તતોઽઙ્કે હિમવતઃ ॥ ૨॥

ક્રમાદેવં ગઙ્ગે ત્રિપથમઘમાશ્રિત્ય ભવતી
જગત્યાં લોકાનાં કલિકલુષમાલાપ્રશમની ।
વિધત્સેઽનાયાસં પ્રગુણપુરુષાર્થશ્ચ ચતુરો
નિરાશોઽયં માભૂત્ સકલવિધિહીનઃ શરણદે ॥ ૩॥

અઘૌઘાર્તાઃ ક્ષુદ્રાસ્તવ સલિલપાનં વિદધતો
નિરાતઙ્કા રઙ્કા અપિ ગલિતપઙ્કા સુકૃતિનઃ ।
દ્રુતં ભાવં ભાવં પ્રકૃતિસુખસન્દોહપદવીં
લભન્તેઽધ્યાસીનાઃ સતતશમસમ્પત્તિમતુલામ્ ॥ ૪॥

પુનાના ત્વં લોકાન્ દલિતગુરુતાપાન્ નિરયતો
હઠાત્ ત્રાયં ત્રાયં ત્રિદિવવનિતા લાલિતતનૂન્ ।
વિધત્સે દૃષ્ટ્વૈતત્ચ્છમનશમવાર્તા વિરહિતા-
દસીયા વૈ દૂતાઃ કલકલપસંશોકવિધુરાઃ ॥ ૫॥

અહં શ્રાવં શ્રાવં વિરુદશરણોઽન્તે વ્યવસિતો
નિજોદ્ધારે માતર્વિબુધતટિનિ પ્રાજ્યતમસામ્ ।
મહાગારો મન્દો મદનમધનોલ્લાસિતજટે
કથઞ્ચિન્નોપેક્ષ્યસ્તવ વિમૃશકં યામિ શરણમ્ ॥ ૬॥

અયે માતસ્ત્રય્યર્પિતકુશલભારઃ સુખમહં
    શયે નવ્યાસઙ્ગસ્ત્વદિતરસમારાધનવિધો ।
વિધેયા નોહેલેષદપિ મમ નિસ્તારસમય
    ઋતે ત્વત્કો નામ ક્ષણમપિ નિરીક્ષેત વદનમ્ ॥ ૭॥

નભસ્વાન્તે લોલોર્મિપ્રપદવલીમ્પ્રાપ્ય પયસાં
    મહૈનઃ સમ્ક્ષોભાદ્વિકલવિધિસમ્મર્દવિહિતઃ ।
મરાવાશ્વિષ્યન્યદ્ યદુપરતદેહં ચલિતવાન્
    અહો સોઽમ્બ પ્રાપ્તઃ સુરપતિપુરન્તત્ પ્રમુદિતઃ ॥। ૮॥

લલાટેષૂત્કીર્ણાં વિધિવિહિત દુલેખિ વિતતિં
    જનાનામાતાર્ત્તાં તવ સવિધગાનાં તિરયસિ ।
નિશમ્યૈતન્માં તત્સ્વશરણસમાયાતમધુના
    સમુદ્ધર્તું માતઃ પરિકરવિધિત્સા ભવતુ મે ॥ ૯॥

ઇતિ શ્રીવિષ્ણુપ્રસાદપાણ્ડેયશાસ્ત્રીવિરચિતં શ્રીગઙ્ગાસ્તવનં સમ્પૂર્ણમ્ ॥

Encoded by Musiri Janakiraman
Proofread by Musiri Janakiraman, PSA Easwaran

*Shri Gangastavanam*
pdf was typeset on June 22, 2021

Please send corrections to *sanskrit@cheerful.com*